# Bhallataka

**भल्लातकं त्रिषु प्रोक्तं अरुष्कोऽरुष्करोऽग्निकः ।**
**तथैवाग्निमुखी भल्ली वीरवृक्षश्च शोफकृत् ॥ (Bpn)**

All the three varieties of bhallataka are known as aruska, aruskara, agnika, agnimukhi, bhalli, viravrksa, sophakrt.

**भल्लातकोऽग्निर्दहनस्तपनोऽरुष्करोऽनलः ।**
**कृमिघ्नस्तैलबीजश्च वातारिः स्फोटबीजकः ॥**
**पृथग्बीजो धनुर्बीजो भल्लातो विजयादपः ।**
**वह्निवरतरुश्चेति विज्ञेयः षोडशाह्वयः ॥ (Rjn)**

Agni dahana, stapana, aruskara, anala, krmighna, taila bija, vatari, sphota bijaka, prthak bija, dhanurbija, bhallato, vijayadapa, vahni vara, taru are the 16 synonyms of bhallataka.

**भल्लातकस्य त्वङ्मांसं बृंहणं स्वादुशीतलम् ।**

**तदस्थयाग्निसमं मेध्यं कफवातहरं लघु ॥**
**कफजो न स रोगाऽस्ति न विबन्धोऽस्ति कश्चन ।**
**यं न भल्लातकं हन्यात् क्षिप्रमग्निबलप्रदम् ॥ (Mdn)**

Bhallataka tvak mamsa is svadu in rasa, sitala in veerya and brmhana in karma.

Its asthi/seed is agni sama, medhya, kapha vata hara, laghu in guna, cures kaphaja vyadhi, vibandha and is agni bala prada.

**भल्लातकफलं पक्वं स्वादुपाकरसं लघु ।**
**कषायं पाचनं स्निगधं तीक्ष्णोष्णं छेदि भेदनं ॥**
**मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम् ।**
**कुष्ठार्शोग्रहणीगुल्मशोफानहज्वरकृमीन् ॥**

तन्मज्जा मधुरा वृष्या बृंहणी वातपित्तहा ।
वृन्तमारुष्करं स्वादु पित्तघ्नं केश्यमग्निकृत् ॥

भल्लातकः कषायोष्णः शुक्ललो मधुरो लघुः ।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान् ॥
हन्ति गुल्मज्वरश्वित्रवह्निमान्द्यकृमिव्रणान् । (Bpn)

Bhallataka phala which is pakva is svadu, kashaya in rasa , laghu, snighda, tiksna in guna, usna in veerya, svadu in paka, pacana, chedi, bhedana, medhya, vahni kara, cures kapha, vata, vrana, udara, kustha, arsa, grahani, gulma, sopha, anaha, jvara and krmi.

Its majja is madhura in rasa, vrsya, brmhani, vata pitta hara. Vrntam is aruskara, svadu in rasa, pittaghna, kesya, agni karaka.

Bhallataka is kashaya in rasa, usna in veerya, sukrala, madhura in rasa, laghu in guna, cures vata, slesma, udara, anaha, kustha, arsa, grahani, gulma, jvara, svitra, vahnimandya, krmi and vrana.

भल्लातः कटुतिक्तोष्णो मधुरः कृमिनाशनः ।
गुल्मार्शोग्रहणीकुष्ठान् हन्ति वातकफामयान् ॥ (Dhn)

Bhallataka is katu, tikta, madhura in rasa, usna in veerya, cures krimi, gulma, arsa, grahani, kustha, and diseases of vata kapha.

भल्लातको लघुस्तिक्तः कषायो मधुरो हिमः ।
ग्राहि पाके कटुः पित्तकफास्रघ्नोऽनिलप्रदः ॥

भल्लातकफलं पक्वं स्वादुपाकरसं गुरु ।
विष्टंभि बृंहणं रूक्षं हिमं वातवलासकृत् ॥
शुक्ललं दुर्जरं बल्यं रक्तपित्तविनाशनम् ।

तस्यास्थि मधुरं तिक्तं कटुपाकरसं लघु ॥

कषायं पाचनं स्निग्धं तीक्ष्णोष्णं छेदि भेदनम् ।
मेध्यं वह्निकरं हन्ति कफवातव्रणोदरम् ॥
कुष्ठार्शोग्रहणीगुल्मशोफानाहज्वरकृमीन् ।

तन्मज्जा मघुरो वृष्यो बृंहणो वातपित्तहा ॥ (Kdn)

Bhallataka is tikta, kashaya, madhura in rasa, laghu in guna, hima in veerya, katu in paka, grahi in karma, alleviates pitta, kapha, asra and anila prada.

Bhallataka phala which is pakva is svadu in paka and rasa, guru, vistambhi, brmhana, ruksa in guna, hima in veerya, vata balsa karaka, sukrala, durjara, balya and rakta pitta vinasana.

Its asthi is madhura, tikta, katu, kashaya in rasa, laghu, snighda, tiksna in guna, katu in paka, pacana, usna, chedi, bhedana, medhya, vahni kara, cures kapha vata vrana udara, kustha, arsa, grahani, gulma, sopha, anaha, jvara and krmi.

Its majja is madhura in rasa, vrsya, brmhana, vata pitta hara.

भल्लातकः कटुस्तिक्तः कषायोष्णः कृमीन् जयेत् ।
कफवातोदरानाहमेहदुर्न्नामनाशनः ॥

भल्लातकस्य फलं कषायमधुरं कोष्णं कफार्त्तिश्रम-
श्वासानाहविबन्धशूलजठराध्मानकृमिध्वंसनम् ।

तन्मज्जा च विशोषदाहशमनी पित्तापहा तर्पणी
वातारोचकहरि दीप्तिजननी पित्तापहा त्वञ्जसा ॥ (Rjn)

Bhallataka is katu, tikta, kashaya in rasa, usna in veerya, cures krmi, kapha, vata, udara, anaha, meha and durnama.

Its phala is Kashaya, madhura in rasa, anusna in veerya, cures kapha, arti, srama, svasa, anaha, vibandha, sula, jathara, adhmana, krmi.

Its majja is visosa, daha samani, pitta hara, tarpani, vata rocaka hari, diptijanani and pitta hara.

भल्लातकफलं स्निग्धं कृमिदुर्न्नामशनम् ।
दन्तस्थैर्यकरं ग्राहि कषायं मधुरं च तत् ।। (Rav)

Bhallataka phala is kashaya, madhura in rasa, snigdha in guna, grahi in karma, cures krmi, durnama and is dantasthairya kara.

फलत्वचा सुमधुरा स्निग्धा लघु कषायका ।
रसे कट्वी पाचिका च लघुतीक्ष्णा च भेदिका ।।
उष्णा छेदनकर्त्री च दीपनी कफनाशिनी ।
मेध्या वातं च कुष्ठं च व्रणं चोदरमेव च ।।
अर्शःसंग्रहणीगुल्मशोफानाहज्वरकृमीन् ।
नाशयेदिति संप्रोक्ता मुनिभिः सत्यवादिभिः ।। (Nir)

Phala tvaca (fruit rind) is sumadhura, kasayaka in rasa, snighda, laghu, tiksna in guna, usna in veerya, katu in paka, bhedika, chedana karaka, dipani, kapha nasaka, medhya, cures vata, kustha, vrana, udara, arsa, samgrahani, gulma, sopha, anaha, jvara, krmi.

भल्लातकानि तीक्ष्णानि पाकीन्यग्निसमानि च ।
भवन्तयमृतकल्पानि प्रयुक्तानि यथाविधि ।।
कफजो न स रोगोऽस्ति न विबन्धोऽस्ति कश्चन ।
यं न भल्लातकं हन्याच्छ्रीघ्रं मेधाग्निवर्धनम् ।। (C.S)

Bhallataka is tiksna in guna, in paka it is similar to agni. If used according to the rules, this becomes equal to amrta kalpa. There would be no kaphaja vyadhi, vibandha and is medha agni vivardhana.

यथा कुष्ठानी सर्वाणि हितः खदिरबीजकौ ।
तथैवार्शांसि सर्वाणि वृक्षकारुष्करौ हितः ।। (Su.S)

Khadira bija destroys all types of kustha similarly bhallataka destroys all types of arsa.

भल्लातकैश्चतुर्भिश्च गोदुग्धस्याढकं शृतम् ।
पीतं करोति वृषतां सुजीर्णस्यापि देहिनः ।। (Sdn)

Intake of bhallataka boiled in 4 parts of godugdha causes vrsa even in jirna deha.

तिलारुष्करसंयोगं भक्षयेदग्निवर्द्धनम् ।
कुष्ठरोगहरम् श्रेष्ठमर्शसां नाशनं परम् ।। (Sdn)

Tila and aruskara mixed together and taken causes agni vardhanam, cures kustha roga, and is sresta arsa nasanam.

तैलं भल्लातकानां तु पिबेन्मासं यथाबलम् ।
सर्वोपद्रवनिर्मुक्तो जीवेद्वर्षशतं दृढः ।। (Vdm)

Taila of bhallataka taken internally for a month according to one’s bala cures all diseases and the person lives for 100 years healthily.

भल्लातकात् कल्ककषायपक्वं सर्पिः पिबेत् शर्करया विमिश्रम् ।
तद्रक्तपित्तं विनिहन्ति पीतं वलासगुल्मं मधुना समेतम् ।। (C.D.)

Ghee prepared with kalka and kashya of bhallaatka pacifies raktapittam if taken with jaggery, cures balasa and gulma if taken with madhu (honey).